Series ΣHEFG

Set-4

प्रश्न-पत्र कोड
Q.P. Code **22**

रोल नं.
Roll No.

परीक्षार्थी प्रश्न-पत्र कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Q.P. Code on the title page of the answer-book.

# संस्कृतम् (केन्द्रिकम्)
# SANSKRIT (Core)

*समयोः : होरात्रयम्* — *पूर्णाङ्काः : 80*

*निर्धारित समय : 3 घण्टे* — *अधिकतम अंक : 80*

*Time allowed : 3 hours* — *Maximum Marks : 80*

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **19** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए प्रश्न-पत्र कोड को परीक्षार्थी उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **18** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।

- Please check that this question paper contains **19** printed pages.
- Q.P. Code given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **18** questions.
- **Please write down the serial number of the question in the answer-book before attempting it.**
- 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

*

***सामान्य निर्देशाः***

- *कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे **19** पृष्ठानि मुद्रितानि सन्ति ।*
- *कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे **18** प्रमुखाः प्रश्नाः सन्ति ।*
- *उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः ।*
- *अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति । अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम् ।*

*प्रश्नपत्रस्वरूपम् :*

*अस्मिन् प्रश्नपत्रे **चत्वारः** खण्डाः सन्ति —*

| | | |
|---|---|---|
| ***खण्डः 'क'*** | – *अपठित-अवबोधनम्* | – *10 अङ्काः* |
| ***खण्डः 'ख'*** | – *रचनात्मक-कार्यम्* | – *15 अङ्काः* |
| ***खण्डः 'ग'*** | – *अनुप्रयुक्त-व्याकरणम्* | – *20 अङ्काः* |
| ***खण्डः 'घ'*** | – *I. पठित-अवबोधनम्* | – *25 अङ्काः* |
| | *II. संस्कृत-साहित्येतिहास-परिचयः* | – *10 अङ्काः* |

*(i)* *अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।*

*(ii)* *प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।*

*(iii)* *प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया ।*

*(iv)* *सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।*

*(v)* *प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।*

## खण्डः 'क'
## अपठितावबोधनम्
## अपठित-अवबोधन
## Unseen Passage

*10 अङ्काः*

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।
निम्नलिखित गद्यांश को पढ़कर प्रदत्त प्रश्नों के उत्तर संस्कृत में दीजिए ।
Read the following passage and answer the given questions in Sanskrit.

मनुष्यः खलु सामाजिकः प्राणी । मनुष्यैः एव समाजस्य निर्माणं भवति । मनुष्याणां सद्व्यवहारेण एव समाजे सुखस्य शान्तेः च स्थापना भवति, ततश्च सामाजिकं वातावरणं सौहार्दपूर्णं भवति । अस्माकं वेदेषु उपदिष्टम् — 'संगच्छध्वं संवदध्वं सं वो मनांसि जानताम् ।' अस्य अयम् अभिप्रायः अस्ति यत् समाजे सर्वे जनाः मिलित्वा चलन्तु, मिलित्वा एकस्वरेण वदन्तु, सर्वे परस्परं जानन्तु, सर्वत्र प्रेमपूर्णः व्यवहारो भवेत् । यजुर्वेदे कथितम् — 'मित्रस्य चक्षुषा सर्वाणि मित्राणि समीक्षे', अर्थात् अहं सर्वान् जनान् मैत्रीभावेन पश्येयम् इति । कुत्रापि हिंसायाः भावना न भवेत् । कस्यचिद् आत्मनः प्रतिकूलम् आचरणं न कर्तव्यम् । अनया भावनया पूर्णः समाजः एव आदर्शसमाजः इति कथ्यते । येषां जीवने परोपकारादयः गुणाः विलसन्ति तेषां जीवनम् एव धन्यं कथ्यते । 'सर्वे भवन्तु सुखिनः' इत्येव अस्माकम् उद्देश्यं भवेत् ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in one word. (Only two questions) *2×1=2*

(i) मनुष्यः कीदृशः प्राणी ?

(ii) अहं सर्वान् केन भावेन पश्येयम् ?

(iii) कस्यचिद् आत्मनः प्रतिकूलं किं न कर्तव्यम् ?

(आ) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in a complete sentence. (Only two questions) *2×2=4*

(i) मनुष्याणां सद्व्यवहारेण किं किं भवति ?

(ii) अस्माकं वेदेषु किम् उपदिष्टम् ?

(iii) केषां जीवनं धन्यं कथ्यते ?

(इ) अस्य गद्यांशस्य उचितं शीर्षकं संस्कृतेन लिखत ।
इस गद्यांश का उचित शीर्षक संस्कृत में लिखिए ।
Write a suitable title for this passage in Sanskrit. *1×1=1*

(ई) यथानिर्देशम् उत्तरत । (केवलं प्रश्नत्रयम्)
निर्देशानुसार उत्तर दीजिए । (केवल तीन प्रश्न)
Answer as directed. (Only three questions) *3×1=3*

(i) 'रचना' इति पदस्य उचितं पर्यायपदं चिनुत ।
   (a) स्थापना
   (b) निर्माणम्
   (c) परस्परम्
   (d) प्रतिकूलम्

(ii) 'कलहपूर्णम्' इति पदस्य उचितं विपरीतपदं चिनुत ।
   (a) संवदध्वम्
   (b) आचरणम्
   (c) सौहार्दपूर्णम्
   (d) वातावरणम्

(iii) 'सर्वे मिलित्वा एकस्वरेण वदन्तु' अत्र वाक्ये क्रियापदं किम् ?
   (a) सर्वे
   (b) मिलित्वा
   (c) वदन्तु
   (d) एकस्वरेण

(iv) 'सर्वाणि' इति पदस्य उचितं विशेष्यपदं चिनुत ।
   (a) मित्राणि
   (b) जनान्
   (c) आचरणम्
   (d) चक्षुषा

## खण्डः 'ख'
## रचनात्मक-कार्यम्
## रचनात्मक-कार्य
## Writing Skills

*15 अङ्काः*

**2.** भवत्याः विद्यालये आयोज्यमाने वार्षिकोत्सवे 'कारगिल-विजयः' इति संस्कृतनाटकस्य मञ्चनं भविष्यति । अस्मिन्नवसरे स्वसख्यै लिखिते निमन्त्रणपत्रे मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत पत्रं च पुनः लिखत ।

आपके विद्यालय में आयोजित होने वाले वार्षिकोत्सव में 'कारगिल-विजयः' नामक संस्कृत नाटक का मञ्चन होगा । इस अवसर पर मित्र को लिखे निमन्त्रण-पत्र में मञ्जूषा में दिए गए शब्दों से रिक्त स्थानों की पूर्ति करके पत्र को पुनः लिखिए ।

On the annual day of your school a performance of a Sanskrit Drama is to take place. In an invitation letter written to your friend, fill in the blanks with words given in the box and rewrite the same. $10\times\frac{1}{2}=5$

प्रिय सखि (i) _________ !

सप्रेम (ii) _________ ।

अत्र कुशलं (iii) _________ । अस्माकं (iv) _________ वार्षिकोत्सवः वसन्तपर्वणि आयोज्यते । अत्र 'कारगिलविजयः' नाम नाटकस्य मञ्चनं छात्रैः (v) _________ । अहमपि सैनिकस्य भार्यायाः भूमिकां निर्वहामि । अस्माभिः अस्य नाटकस्य प्रतिदिनं (vi) _________ क्रियते । त्वम् एतन्नाटकं दृष्ट्वा नूनं (vii) _________ अनुभविष्यसि । एतदवसरे त्वया अवश्यमेव अत्र (viii) _________ । परिवारे सर्वेभ्यः मम प्रणामाञ्जलिः (ix) _________ ।

तव प्रिय सखी

(x) _________

**मञ्जूषा**

| |
|---|
| तत्रास्तु, निर्मले !, पूर्वाभ्यासः, प्रस्तोष्यते, सुजाता, आनन्दम्, आगन्तव्यम्, नमः, विद्यालयस्य, निवेदनीया । |

**3.** (क) मञ्जूषाप्रदत्तशब्दानां सहायतया अधोलिखितायां लघुकथायां रिक्तस्थानानि पूरयित्वा कथां पुनः लिखत ।

मंजूषा में दिए गए शब्दों की सहायता से नीचे लिखी लघुकथा में रिक्त स्थान भरकर कथा को पुनः लिखिए ।

Complete the blanks of the following short story, with the help of the words given in the box below and rewrite the same. *$10\times\frac{1}{2}=5$*

एकदा एकः राजा (i) __________ स्यूतं सेवकाय दत्त्वा अवदत् — गच्छ एतद् धनं साधुषु (ii) __________ आगच्छ । सेवकः सर्वत्र अभ्रमत्, बहून् (iii) __________ मिलित्वा धनं दातुं प्रयत्नम् (iv) __________, परन्तु कोऽपि साधुः तस्मिन् रुचिं न प्रदर्शितवान् । परं सेवकं परितः ये जनाः आसन् ते सर्वे धनं (v) __________ प्रार्थितवन्तः । सेवकः अवदत् — एतद् धनं तु साधुषु एव वितरितुम् इच्छति अस्माकं (vi) __________ । यदि अन्येभ्यः जनेभ्यः ददामि तर्हि "राजा (vii) __________ भविष्यति" इति । अन्ततः सः स्यूतं राज्ञः (viii) __________ आनयत् अवदत् च — 'राजन् ! ये साधवः ते धनं न इच्छन्ति, ये धनम् इच्छन्ति ते (ix) __________ न सन्ति । इदानीं कः आदेशः ? राजा तेन धनेन साधुभ्यः (x) __________ व्यवस्थाम् अकारयत् ।

**मञ्जूषा**

| |
|---|
| वितीर्य, धनपूर्णम्, साधून्, प्राप्तुम्, अकरोत्, राजा, क्रुद्धः, समीपे, आश्रमाणां, साधवः । |

**अथवा (OR)**

(ख) अधोलिखित-संवादे रिक्तस्थानानि पूरयत ।

निम्नलिखित संवाद में रिक्त स्थान भरिए ।

Fill in the blanks in the conversation. *5×1=5*

*निशा* — विभे ! जानासि किम्, यत् अस्माकं प्रधानमन्त्री रक्तदुर्ग-प्राचीरतः जनान् कदा सम्बोधयति ?

*विभा* — (i) ____________________ ।

*निशा* — स्वतन्त्रतादिवसः कस्मिन् मासे भवति ?

*विभा* — (ii) ____________________ ।

*निशा* — अगस्तमासस्य कस्मिन् दिनाङ्के भवति ?

*विभा* — (iii) ____________________ ।

*निशा* — पञ्चदश-दिनाङ्के प्रधानमन्त्री तत्र किं करोति ?

*विभा* — (iv) ____________________ ।

*निशा* — ध्वजारोहणानन्तरं किं प्रधानमंत्री तत्र राष्ट्रियजनान् अपि सम्बोधयति ?

*विभा* — (v) ____________________ ।

*निशा* — प्रधानमन्त्री स्वसम्बोधने देशस्य प्रगतिविषये, विकासविषये, रक्षाविषये, विदेशनीति-विषये अन्येषु च विषयेषु अपि स्वविचारान् प्रस्तौति ।

**4.** निम्नलिखितवाक्येषु केषाञ्चन ***पञ्च*** वाक्यानां संस्कृतेन अनुवादं कुरुत ।
निम्नलिखित वाक्यों में से किन्हीं ***पाँच*** वाक्यों का संस्कृत में अनुवाद कीजिए ।
Translate any ***five*** sentences in Sanskrit from the following sentences. *5×1=5*

(i) गौरव पुस्तकें पढ़ता है ।
Gaurav reads books.

(ii) शिक्षक छात्र को पुरस्कार देता है ।
The teacher gives a prize to the student.

(iii) मोनिका बाज़ार जाती है ।
Monika goes to the market.

(iv) मैं कल विद्यालय जाऊँगा ।
I will go to the school tomorrow.

(v) रुचि श्वेता के साथ गाएगी ।
Ruchi will sing with Shweta.

(vi) कल रविवार था ।
Yesterday was Sunday.

## खण्डः 'ग'

## अनुप्रयुक्त-व्याकरणम्

*20 अङ्काः*

## अनुप्रयुक्त-व्याकरण

## Applied Grammar

**5.** अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिच्छेदं सन्धिं वा कुरुत । (प्रश्नषट्कम् केवलम्)

निम्नलिखित वाक्यों में रेखाङ्कित पदों की सन्धिच्छेद अथवा सन्धि कीजिए । (केवल छः प्रश्न)

Disjoin or join sandhis in the underlined words of the following sentences. (Only six questions) *6×1=6*

(i) वेदमनूच्य आचार्योऽन्तेवासिनम् अनुशास्ति ।

(ii) आर्य ! गुणाः खल्वत्र ।

(iii) वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ।

(iv) संन्यासिन् ! बहु + उक्तम, विरम ।

(v) शूरं कृतज्ञं दृढसौहृदम् + च ।

(vi) सुमित्रामातः ! इतस्तावत् ।

(vii) धर्मात् न प्रमदितव्यम् ।

**6.** अधोलिखितवाक्येषु रेखाङ्कितपदानाम् उचितं समस्तपदं विग्रहं वाक्यं वा प्रदत्तविकल्पेभ्य चिनुत । (केवलं प्रश्नपञ्चकम्)

निम्नलिखित वाक्यों में रेखाङ्कित पदों का उचित समस्त पद या उचित विग्रह वाक्य को प्रदत्त विकल्पों से चुनिए । (केवल पाँच प्रश्न)

Select the appropriate expound for the underlined words 'समस्तपद' or 'विग्रह वाक्य' of the following sentences. (Only five questions) *5×1=5*

(i) एतद् अनुशासनम्

(a) न अनुशासनम् (b) अनु शासनम्

(c) शासनस्य पश्चात् (d) शासनम् अनु

(ii) दिलीपः आकारेण सदृशी प्रज्ञा यस्य सः आसीत् ।

(a) आकारसदृशप्रज्ञः

(b) आकारसदृशीप्रज्ञा

(c) आकारसदृशप्रज्ञा

(d) आकारप्रज्ञासदृशः

(iii) तत् किमपि इच्छाम् अनतिक्रम्य पृच्छ ।

(a) इच्छामनतिक्रम्य

(b) यथेच्छम्

(c) यथेच्छा

(d) इच्छानुसारम्

(iv) उत्साहसम्पन्नम् अदीर्घसूत्रं क्रियाविधिज्ञम् ।

(a) न अदीर्घसूत्रम्

(b) न दीर्घसूत्रम्

(c) दीर्घं च सूत्रं च

(d) दीर्घसूत्रम् न

(v) तदनु स्वयमेव कुलगुरुं पितरौ च सभाजयितुं गमिष्यावः ।

(a) माता च पिता च

(b) माता च माता च

(c) पिता च पिता च

(d) माता च पितरौ च

(vi) यक्ष्ये दास्यमि मोदिष्य इति अज्ञानविमोहिताः ।

(a) अज्ञानस्य विमोहिताः

(b) अज्ञानात् विमोहिताः

(c) अज्ञानेन विमोहिताः

(d) अज्ञानाय विमोहिताः

**7.** अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृतिप्रत्ययं प्रदत्तविकल्पेभ्यः चिनुत । (केवलं प्रश्नषट्कम्)

निम्नलिखित वाक्यों में रेखाङ्कित पदों के उपयुक्त संयुक्त अथवा विभक्त प्रकृति प्रत्यय दिए हुए विकल्पों में से चुनिए । (केवल छः प्रश्न)

From the given sentences, choose the correct combination of joint or disjoint set of suffix for the underlined words. (Only six questions) *6×1=6*

(i) कापालिकः अवदत् राजन् ! मा भैषीः ।

(a) कपाली + ठक् (b) कापाल + ठक्

(c) कपाल + ठक् (d) कपाल + मतुप्

(ii) आर्य ! ननु वच् + तव्यत् ।

(a) वक्तव्यम् (b) वदितव्यम्

(c) उक्तवान् (d) वदिनीयम्

(iii) अन् + इष् (इच्छ्) + शतृ अपि वत्सराजः भोजं वनं नीतवान् ।

(a) अनिच्छमानः

(b) अनिच्छन्

(c) अनिच्छितम्

(d) अनिच्छनीयम्

(iv) कोऽपि धृततुम्बीपात्रः सन्यासी दृष्टः ।

(a) सन्यास + ई

(b) सन्यास + मतुप्

(c) सन्यास + ईन

(d) सन्यास + इन्

(v) तस्या एव खलु वचनात् भवदभिषेको निवृत्तः ।

(a) नि + वृत् + क्तवतु

(b) नि + वृत् + तव्यत्

(c) नि + वृत् + क्त

(d) नि + वृत् + ल्यप्

(vi) ततो राजा भोजवधं ज्ञात्वा तं पृष्टवान् ।

(a) पृच्छ् + क्त
(b) प्रच्छ् + तव्यत्

(c) प्रच्छ् + क्तवतु
(d) पृच्छ् + शानच्

(vii) नर्तिष्यसि तदा एकाकिनी भव ।

(a) एकाकिन् + ङीप्
(b) एकाकिन् + क्तिन्
(c) एकाकिन् + टाप्
(d) एकाकिन् + शतृ

**8.** समुचितम् उपपद-विभक्तिरूपं चिनुत । (केवलं प्रश्नत्रयम्)

उपयुक्त उपपद-विभक्ति रूप को चुनिए । (केवल तीन प्रश्न)

Choose the appropriate subordinate clause form. (Only three questions) *3×1=3*

(i) _________ न प्रमदितव्यम् ।

(a) सत्यम्
(b) सत्येन
(c) सत्याय
(d) सत्यात्

(ii) नूनं वसुमती _________ समं यास्यति ।

(a) त्वया
(b) त्वम्
(c) तव
(d) तुभ्यम्

(iii) नारीणाम् _________ अधिकृत्य भवतां के विचाराः ?

(a) स्वाधीनम्
(b) स्वाधीनता
(c) स्वाधीनताम्
(d) स्वाधीनतया

(iv) कथं कथं _________ उपगतः ?

(a) मोहम्
(b) मोहेन
(c) मोहात्
(d) मोहाय

## खण्डः 'घ'

## (i) पठितावबोधनम्

25 अङ्काः

## पठित-अवबोधन

## Reading Comprehension

**9.** अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत ।
निम्नलिखित गद्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए ।
Read the following prose passage and answer the questions based on them in Sanskrit. *5*

वत्सराजस्य इमं वचनमाकर्ण्य कुपितो राजा प्राह — त्वं मम सेवकोऽसि, मया यत्कथ्यते त्वया तद् विधेयम् । पुनः वत्सराजः राजाज्ञा पालनीयैवेति मत्वा तूष्णीं बभूव । अनन्तरम् अनिच्छन्नपि वत्सराजः भोजं रथे निवेश्य रात्रौ वनं नीतवान् । तत्र आत्मनो वधयोजनां ज्ञात्वा भोजः किमपि वत्सराजं कथितवान् तद्वचनैः वैराग्यमापन्नो वत्सराजः तं न हतवान्, अपितु गृहमागत्य भोजं गृहाभ्यन्तरे भूमौ निक्षिप्य ररक्ष । पुनः कृत्रिमरूपेण भोजस्य मस्तकं कारयित्वा राजभवनं गत्वा वत्सराजो राजानं प्राह — श्रीमता यदादिष्टं तत्साधितमिति ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in one word. (Only two questions) $2\times\frac{1}{2}=1$

(i) कस्य वचनमाकर्ण्य कुपितो राजा प्राह ?

(ii) वत्सराजः कं रथे निवेश्य रात्रौ वनं नीतवान् ?

(iii) का पालनीया एव ?

(आ) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in a complete sentence. (Only two questions) $2\times1=2$

(i) वत्सराजस्य वचनमाकर्ण्य कुपितो राजा किं प्राह ?

(ii) वत्सराजः भोजं कथं ररक्ष ?

(iii) राजभवनं गत्वा वत्सराजः राजानं किं प्राह ?

(इ) यथानिर्देशम् उत्तरत । (केवलं प्रश्नद्वयम्)
निर्देशानुसार उत्तर दीजिए । (केवल दो प्रश्न)
Answer as directed. (Only two questions) *2×1=2*

(i) 'प्रसन्नः' इति पदस्य विलोमपदं किं प्रयुक्तम् ?

(ii) 'बभूव' इति क्रियापदस्य कर्तृपदं किम् ?

(iii) 'वत्सराजः तं न हतवान्' अत्र 'तम्' सर्वनामपदं कस्मै प्रयुक्तम् ?

**10.** अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत ।
निम्नलिखित पद्य को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए ।
Read the following poetry and answer the questions based on them in Sanskrit. *5*

कर्णामृतं सूक्तिरसं विमुच्य,
दोषेषु यत्नः सुमहान् खलानाम् ।
निरीक्षते केलिवनं प्रविश्य,
क्रमेलकः कण्टकजालमेव ।।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in one word. (Only two questions) $2\times\frac{1}{2}=1$

(i) खलानाम् केषु यत्नः भवति ?

(ii) खलानां कीदृशः यत्नः दोषेषु भवति ?

(iii) कः कण्टकजालं निरीक्षते ?

(आ) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in a complete sentence. (Only two questions) *2×1=2*

(i) किं विमुच्य खलानां यत्नः दोषेषु भवति ?

(ii) क्रमेलकः कुत्र प्रविश्य किं निरीक्षते ?

(iii) पद्ये सुक्तिरसं कीदृशं प्रोक्तम् ?

(इ) यथानिर्देशम् उत्तरत । (केवलं प्रश्नद्वयम्)
निर्देशानुसार उत्तर दीजिए । (केवल दो प्रश्न)
Answer as directed. (Only two questions) *2×1=2*

(i) 'यत्नः' इति पदस्य विशेषणपदं किम् ?

(ii) 'उष्ट्रः' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

(iii) 'गुणेषु' इति पदस्य विलोमपदं किं प्रयुक्तम् ?

**11.** अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत ।

निम्नलिखित नाट्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए ।

Read the following part of a drama and answer the questions based on it in Sanskrit. *5*

*कुण्डला* — परस्परप्रीतिमतोः भवतो उपदेशस्य नास्ति कोऽपि अवकाशः, तदापि सखीस्नेहः मां भाषयति – भर्त्रा सदैव भार्या भर्तव्या रक्षितव्या च । यतो हि धर्मार्थकामसंसिद्धये यथा भार्या भर्तुः सहायिनी भवति तथा न कोऽपि अन्यः । परमनुव्रतौ पतिपत्न्यौ त्रिवर्गं साधयतः । पतिः यदि प्रभूतं धनम् अर्जयित्वा गृहमानयति तत् खलु पत्न्यभावे कुपात्रेषु दीयमानं क्षयमेति ।

*ऋतध्वजः* — लक्ष्म्याः रक्षार्थं पत्न्याः सहयोगः अनिवार्यः ।

*मदालसा* — कुण्डले ! लक्ष्मीपूजायां न मे प्रवृत्तिः । यदि लक्ष्मीः पूज्या, प्रिया च अतिथिवर्यस्य, तदा इदानीमेव मे नमस्कारः ।

*ऋतध्वजः* — स्वाभिमानिनि प्रिये ! समक्षं ते कथं कापि सपत्नी स्थातुं शक्नोति ? लक्ष्मीस्तु तव दासी भविष्यति नैव सपत्नी । मद्गार्हस्थ्यं तु त्वदधीनं भविष्यति । आत्मानं भाविसन्ततिं च ज्ञानविज्ञानानुसन्धात्र्या हस्ते समर्पयितुमीहे । आगम्यताम् गुरुभ्यः पितृभ्यां च समाचारं श्रावयावः ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)

एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)

Answer in one word. (Only two questions) $2\times\frac{1}{2}=1$

(i) तदापि कः मां भाषयति ?

(ii) परमनुव्रतौ पतिपत्न्यौ कतिवर्गं साधयतः ?

(iii) लक्ष्म्याः रक्षार्थं कस्याः सहयोगः अनिवार्यः ?

(आ) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)

पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)

Answer in a complete sentence. (Only two questions) $2\times1=2$

(i) धर्मार्थकामसिद्धये भर्तुः का सहायिनी भवति ?

(ii) ऋतध्वजः मदालसां सपत्नीविषये किं कथयति ?

(iii) पत्न्यभावे केषु दीयमानं धनं क्षयमेति ?

(इ) यथानिर्देशम् उत्तरत । (केवलं प्रश्नद्वयम्)

निर्देशानुसार उत्तर दीजिए । (केवल दो प्रश्न)

Answer as directed. (Only two questions) *2×1=2*

(i) 'प्रभूतम्' इति विशेषणस्य विशेष्यपदं किं प्रयुक्तम् ?

(ii) 'सुपात्रेषु' इति पदस्य विलोमपदं किं प्रयुक्तम् ?

(iii) 'साधयतः' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?

**12.** (क) अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखित ।

निम्नलिखित पद्य का भावार्थ मञ्जूषा में दिए हुए शब्दों से भरकर पुनः लिखिए ।

Rewrite the gist of the following verse by filling it with the help of the words given in the box. *3×1=3*

अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः ।

मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ।।

**भावार्थ :**

परद्वेषिणः जनाः मिथ्याहङ्कारम्, बलम्, गर्वम् (i) __________ क्रोधम् च आश्रिताः सन्तः आत्मनि (ii) __________ च स्थितं माम् प्रति (iii) __________ कुर्वाणाः दृश्यन्ते ।

**मञ्जूषा**

| द्वेषम्, कामनां, परदेहेषु । |
|---|

**अथवा (OR)**

(ख) प्रदत्तभावार्थ-त्रयात् शुद्धं भावार्थं चित्वा लिखत ।

दिए गए तीन भावार्थों में से शुद्ध भावार्थ चुनकर लिखिए ।

Write the correct essence from three essences of the following each part. *3×1=3*

(i) 'अपूर्वः खल्वस्यायासः ।'

(a) अस्य आयासः प्रशंसनीयः ।

(b) अस्य प्रयासः विफलः ।

(c) अस्य प्रयासः निश्चितरूपेण आश्चर्यकरः अस्ति ।

(ii) 'अनन्यशासनामुर्वीं शशासैक पुरीमिव ।'

(a) न अन्यशासकेन शासितां पृथ्वीं एकपुरीमिव शासनं चकार ।

(b) अन्यशासकेन शासितां वसुधां शशास ।

(c) सर्वशासकेन शासितं शासनं चकार ।

(iii) 'वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति ।'

(a) आचार्यः वेदं पाठयति ।

(b) शिष्यः वेदं पठति ।

(c) आचार्यः वेदं पाठयित्वा शिष्यम् अनुशास्ति ।

**13.** अधोलिखितश्लोकस्य प्रदत्ते अन्वये रिक्तस्थानानि पूरयत ।

निम्नलिखित श्लोक के अन्वय में रिक्तस्थान भरिए ।

The prose-order rendering of the following verse is given, fill in the blanks. *3×1=3*

प्रजानां विनयाधानाद्रक्षणाद् भरणादपि ।

स पिता पितरस्तासां केवलं जन्महेतवः ।।

**अन्वय :**

सः (i) __________ विनयाधानात् रक्षणाद् भरणाद् अपि (ii) __________ (आसीत्) तासां पितरः केवलं (iii) __________ (आसन्) ।

**14.** 'क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत :

'क' स्तम्भ के वाक्यांश का 'ख' स्तम्भ के वाक्यांश के साथ मिलान कीजिए :

Match the sentences of column 'क' with the suitable sentences of column 'ख' : $4\times\frac{1}{2}=2$

| | *'क' स्तम्भ* | | *'ख' स्तम्भ* |
|---|---|---|---|
| (i) | यान्यनवद्यानि कर्माणि | (अ) | वयं वा ननु तत्समम् । |
| (ii) | भरतो वा भवेद् राजा | (ब) | तानि सेवितव्यानि । |
| (iii) | अपेक्षया रूपवतां हि विद्या | (स) | मिमं प्राप्स्ये मनोरथम् । |
| (iv) | इदमद्य मया लब्ध | (द) | मानं लभन्तेऽतितरां जगत्याम् । |

**15.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारं शुद्धम् अर्थं मञ्जूषातः चित्वा लिखत ।
निम्नलिखित वाक्यों में रेखाङ्कित पदों का प्रसंगानुसार शुद्ध अर्थ मञ्जूषा से चुनकर लिखिए ।
Choose and write the appropriate meanings of the underlined words in the following with the help of the words given in the box. $4\times\frac{1}{2}=2$

(i) आह्लादितं कुलं सर्वं यथा चन्द्रेण शर्वरी ।

(ii) मत्कृते आवश्यकता नास्ति अवलम्बनस्य ।

(iii) मान्धाता च महीपतिः कृतयुगालङ्कारभूतो गतः ।

(iv) अजीर्णे भेषजं वारि ।

**मञ्जूषा**

| |
|---|
| राजा, जलम्, रात्रिः, आश्रयस्य । |

**(ii) संस्कृतसाहित्यस्य सामान्यपरिचयः** *10 अङ्काः*

**संस्कृत साहित्य का सामान्य परिचय**

**General Introduction to Sanskrit Literature**

**16.** ग्रन्थस्य कवेः वा समुचितं नाम मञ्जूषा-प्रदत्त शब्दानां सहायतया रिक्तस्थानेषु लिखत । (केवलं प्रश्नत्रयम्)
मञ्जूषा में दिए गए शब्दों की सहायता से रिक्त स्थान में ग्रन्थ अथवा कवि का नाम लिखिए । (केवल तीन प्रश्न)
Write the appropriate name of the book or poet in the blanks with the help of the words provided in the box. (Only three questions) $3\times1=3$

(i) अनुशासनम् इति पाठः कस्मात् ग्रन्थात् संग्रहीतः ?

(ii) भोजप्रबन्धः कस्य कवेः रचना अस्ति ?

(iii) 'दौवारिकस्य निष्ठा' इति पाठः कस्मात् ग्रन्थात् संगृहीतः ?

(iv) श्रीमद्भगवद्गीता ग्रन्थात् कः पाठः संगृहीतः ?

**17.** गद्य-पद्य-चम्पूकाव्यस्य च विधानां समुचितं वैशिष्ट्यं मञ्जूषातः चित्वा रिक्तस्थानेषु लिखत । (केवलं प्रश्नत्रयम्)

पद्यकाव्य, गद्यकाव्य एवं चम्पूकाव्य की विधाओं की विशिष्टता को मंजूषा से चुनकर रिक्तस्थानों में लिखिए । (केवल तीन प्रश्न)

Choose from the box the appropriate characteristics of the genres of epic, prose, poetry and champoo poetry and write them in the blanks. (Only three questions) *3×1=3*

(i) महाकाव्यस्य विभाजनं _________ भवति ।

(ii) पद्यकाव्यस्य वैशिष्ट्यं _________ भवति ।

(iii) कादम्बरी _________ ग्रन्थो वर्तते ।

(iv) चम्पूकाव्यं _________ भवति ।

**मञ्जूषा**

| |
|---|
| गद्यपद्यमयम्, गद्यकाव्यस्य, सर्गेषु, गेयता । |

**18.** नाट्यतत्त्वानि अधिकृत्य समुचितं मेलनं कुरुत ।

नाट्यतत्त्वों के आधार पर समुचित मिलान कीजिए ।

Make an appropriate comparison on the basis of the elements of Drama. *4×1=4*

| | *'क'* | *'ख'* |
|---|---|---|
| (i) | रूपकस्य | सूत्रधारः प्रविशति । |
| (ii) | नान्दी-अन्ते | भरतमुनिः । |
| (iii) | नाट्यशास्त्रस्य रचयिता | प्रधानरसः शृङ्गारः अस्ति । |
| (iv) | 'अभिज्ञानशाकुन्तलम्' नाटकस्य | दशभेदाः सन्ति । |